संस्कृत

ग्रं.नं. १२८

याज्ञिक

विधि: प्रयोग - ८ - स्मार्त

# समुद्रस्नान विधि

(३)

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. " Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

1

श्रीगणेशाय नमः ॥ अथ समुद्रस्नानविधिः ॥ समुद्रे पर्वसु स्नायाद
दमावास्यां विशेषतः ॥ पापैर्विमुच्यते सर्वै रमायां स्नानमाचरे
त् ॥ भृगुभौमदिने स्नानं नित्यमेव विवर्जयेत् ॥ भारते ॥ अश्वत्थसाग
रौ सेव्यौ न स्प्रष्टव्यौ कदाचन ॥ अश्वत्थं मंदवारे तु सागरं पर्वणि स्पृशेत् ॥
पृथ्वीचंद्रोदये स्कांदे ॥ मुनानापि पर्वणि स्नानात् तर्पणैः सारितांपतिः ॥ कदा
चिदपि नैवापि स्नानं कुर्यादपर्वणि ॥ अस्यापवादस्तत्रैव प्रभासखंडे ॥
पर्वकाले च संप्राप्ते नदीनां च समागमे ॥ सेतुबंधे तथा सिंधौ तीर्थे
ष्वन्येषु संयुतः ॥ एवमादिषु सर्वेषु मेध्योऽन्येन तु स्वकर्मणि ॥ तथा ॥ वि
नामंत्रं विना पर्वक्षौरकर्म विना नरः ॥ कुशाग्रेणापि देवेशि न स्प्रष्टव्यो
महोदधिः ॥ तथा ॥ न कालनियमः सेतौ समुद्रस्नानकर्मणि ॥ तद्दि

(१४)

धिस्तत्रैव ॥ पिप्पलादसमुत्पन्ने कृत्ये लोकभयंकरे ॥ पाषाणं ते मया दत्तमा
हारार्थं प्रकल्पितम् ॥ तामिनिपाषाणं त्रीक्षिप्य ॥ ...श्वा... च पाताची चाविश्वयो
नेविरूपाक्षपते ॥ सान्निध्यं कुरु देवेश सागरे लवणांभसि ॥ नमस्ते विश्व
गुह्याय नमो विष्णो अपांपते ॥ नमो जलधिरूपाय नदीनां पतये नमः ॥ स
मस्त जगदाधार शंखचक्रगदाधर ॥ देहि देव ममानुज्ञां तव तीर्थनिवेशने ॥
त्रिलक्षात्मककावेरणं नमो विष्णु... पते ॥ सान्निध्यं कुरु देवेश साग
रे लवणांभसि ॥ अग्निश्च योनि... श्च देहोरेतोधा विष्णुरमृतस्य ना
भिः ॥ एतद्ब्रुवन्पांडव सत्यवाक्यं ततोवगाहेत पतिं नदीनामिति भारतोक्तम
न्त्रान्पठित्वा विधिवत्स्नायात् ॥ सर्वरत्नोपशोभवान् श्रीमान् सर्वरत्नाकरा
यतः ॥ सर्वरत्नप्रधानस्त्वं गृहाणार्घ्यं महोदधे ॥ इत्यर्घ्यं दत्वा तर्पणं ॥
यथोक्तं पृथ्वीचंद्रोदये स्कांदे ॥ पिप्पलादादिकं वंच कृतांतं जीवकेश्वरं

२

वासिष्ठं वामदेवं च पराशरमुमापतिं॥ वाल्मीकं नारदं चैव वालखिल्यांस्तथैव
च॥ जांबवंतं हनूमंतं नलं नीलं गवाक्षं च गवयं गंधमादनं॥ जांबवंतं हनू
मंतं सुग्रीवं चांगदं तथा॥ मैंदं चाद्विविदं चैव ऋषभं शरभं तथा॥ रामं चल
क्ष्मणं चैव सीतां चैव यशस्विनीं॥ एतान्संतर्पयेद्विद्वाञ्जलमध्ये विशेषतः॥
आब्रह्मस्तंबपर्यंतं यत्किंचित्सचराचरं॥ मर्यादने नतो येन तास्तमे
वाभिगच्छति॥ ॥ इति श्रीमीमांसक नारायणभट्टसूरिसूनु रामकृष्ण
भट्टात्मज दिनकरभट्टानुज कमलाकरभट्टकृते निर्णयसिंधौ प्र
थमपरिच्छेदे समुद्रस्नानविधिः॥

२

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com